**A** SL. No. : S

ಒಟ್ಟು ಪ್ರಶ್ನೆಗಳ ಸಂಖ್ಯೆ : 50 ]
Total No. of Questions : 50 ]

**CCE RR**
**REVISED**

[ ಒಟ್ಟು ಮುದ್ರಿತ ಪುಟಗಳ ಸಂಖ್ಯೆ : 8
[ Total No. of Printed Pages : 8

ಸಂಕೇತ ಸಂಖ್ಯೆ : **16-S** **Code No. : 16-S**

# ವಿಷಯ : ಪ್ರಥಮ ಭಾಷೆ — ಸಂಸ್ಕೃತ
# Subject : First Language — SANSKRIT
# प्रथम भाषा — संस्कृतम्

**( ಹೊಸ ಪಠ್ಯಕ್ರಮ / New Syllabus )**

**(ಪುನರಾವರ್ತಿತ ಶಾಲಾ ಅಭ್ಯರ್ಥಿ / Regular Repeater)**

ದಿನಾಂಕ : 25. 06. 2019 ] [ Date : 25. 06. 2019
ಸಮಯ : ಬೆಳಗ್ಗೆ 9-30 ರಿಂದ ಮಧ್ಯಾಹ್ನ 12-30 ರವರೆಗೆ ] [ Time : 9-30 A.M. to 12-30 P.M.
ಗರಿಷ್ಠ ಅಂಕಗಳು : 100 ] [ Max. Marks : 100

## ಪರೀಕ್ಷಾರ್ಥಿಗಳಿಗೆ ಸಾಮಾನ್ಯ ಸೂಚನೆಗಳು :

1. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯು 50 ವಸ್ತುನಿಷ್ಠ ಮತ್ತು ವಿಷಯನಿಷ್ಠ ಮಾದರಿಯ ಪ್ರಶ್ನೆಗಳನ್ನು ಹೊಂದಿದೆ.
2. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಹಿಮ್ಮುಖ ಜಾಕೆಟ್ ಮೂಲಕ ಮೊಹರು (ಸೀಲ್) ಮಾಡಲಾಗಿದೆ. ಪರೀಕ್ಷೆ ಪ್ರಾರಂಭವಾಗುವ ಸಮಯಕ್ಕೆ ನಿಮ್ಮ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಬಲಬದಿ ಪಾರ್ಶ್ವವನ್ನು ಕತ್ತರಿಸಿ, ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯಲ್ಲಿ ಎಲ್ಲಾ ಪುಟಗಳು ಇವೆಯೇ ಎಂದು ಪರೀಕ್ಷಿಸಿಕೊಳ್ಳಿ.
3. ವಸ್ತುನಿಷ್ಠ ಮತ್ತು ವಿಷಯನಿಷ್ಠ ಮಾದರಿಯ ಪ್ರಶ್ನೆಗಳಿಗೆ ಕೊಟ್ಟಿರುವ ಸೂಚನೆಗಳನ್ನು ಪಾಲಿಸಿ.
4. ಬಲ ಭಾಗದಲ್ಲಿ ಕೊಟ್ಟಿರುವ ಅಂಕಿಗಳು ಪ್ರಶ್ನೆಗಳಿಗಿರುವ ಪೂರ್ಣ ಅಂಕಗಳನ್ನು ತೋರಿಸುತ್ತವೆ.
5. ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಓದಿಕೊಳ್ಳಲು 15 ನಿಮಿಷಗಳ ಕಾಲಾವಕಾಶವು ಸೇರಿದಂತೆ, ಉತ್ತರಿಸಲು ನಿಗದಿಪಡಿಸಲಾದ ಸಮಯವನ್ನು ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಮೇಲ್ಭಾಗದಲ್ಲಿ ಕೊಡಲಾಗಿದೆ.

## परीक्षार्थिनां सामान्यसूचनाः

1. अस्मिन् प्रश्नपत्रे पञ्चाशत् (50) वस्तुनिष्ठाः व्यक्तिनिष्ठाश्च प्रश्नाः सन्ति ।
2. इदं प्रश्नपत्रं विपरीतेन आवरणेन मुद्रिताङ्कमस्ति । परीक्षासमये प्रश्नपत्रमुद्घाटयितुं दक्षिणपार्श्वेन कर्तयत । प्रश्नपत्रस्य पृष्ठानि पूर्णानि सन्ति इति वा पर्यालोचयत ।
3. व्यक्तिनिष्ठानां वस्तुनिष्ठानाञ्च प्रश्नानां विषये निर्दिष्टाः नियमाः अनुपालनीयाः ।
4. प्रश्नानां प्रति अधिकृताः अङ्काः पार्श्वे लिखिताः सन्ति ।
5. प्रश्नपत्रमुत्तरयितुं निर्धारितः समयावधिः प्रश्नपत्रस्य उपरि भागे लिखितः अस्ति । पञ्चदशनिमेषाः प्रश्नपत्रस्य पठनार्थं निर्धारिताः सन्ति ।

इतः कर्तयत

**TEAR HERE TO OPEN THE QUESTION PAPER**
**प्रश्नपत्रमुद्घाटयितुमितः कर्तयत**

**Tear here**

# भागः - A

## ( गद्य-पद्य-पूरकपाठाः )

### ( 62 अङ्काः )

I. एकवाक्येन उत्तरं लिखत — 11 × 1 = 11

1. वज्रायुधेन वृत्रं कः जघान ?
2. विज्ञानप्रदर्शिनी कया आयोजिता ?
3. सत्यव्रतशास्त्रिमहोदयस्य गृहपरिसरः कथम् आसीत् ?
4. मन्थरा कस्याः हृदयं निर्ममन्थ ?
5. पुरुषेण यत्नैः कः साध्यः ?
6. इदं सर्वं केन वास्यम् ?
7. भारतीयभावना निरन्तर किं ददाति ?
8. केसरी कुत्र राज्यं पालयतिस्म ?
9. वारिमुचः कीदृशं जलं पिबन्ति ?
10. आहारार्थं किं कुर्यात् ?
11. रमणमहर्षेः पिता कः ?

II. चतुर्थपदं लिखत — 4 × 1 = 4

12. पुष्पैः सह फलन्ति – द्रुमाः :: पुष्पैः विना फलन्ति – .........................।
13. राजा – सिन्धुलः :: राजकुमारः – ........................... ।
14. करुणः – शोकः :: शान्तः – ........................... ।
15. भूपालः – उत्तानपादः :: सर्वलोकशरण्यः – ........................... ।

III. लघूत्तराणि संस्कृतभाषया लिखत – 4 × 2 = 8

16. तैत्तिरीये सूर्यस्य विषये किं लिखितमस्ति ?

**अथवा**

पादपजातयः काः ? तासां जन्म कथं भवति ?

17. सत्यव्रतशास्त्रिमहोदयेन प्राप्ताः देशीयाः प्रशस्तयः काः ?

18. दैवपुरुषकारयोः विषये भीष्मः युधिष्ठिरं प्रति किं वदति ?

19. सुमन्त्रप्रमुखाः दशरथाय किं व्यजिज्ञपन् ?

IV. श्लोकतात्पर्यं कर्णाटकभाषया, आङ्ग्लभाषया, संस्कृतभाषया वा लिखत – 2 × 2 = 4

20. यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय ।
तथा विद्वान् नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम् ।।

21. रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा ।
जुगुप्साविस्मयशमाः स्थायिभावाः प्रकीर्तिताः ।।

**अथवा**

ततं चैवावनद्धञ्च घनं सुषिरमेव च ।
चतुर्विधं च विज्ञेयम् आतोद्यं लक्षणान्वितम् ।।

V. कव्योः देश-काल-कृतीनां विषये लिखत – 2 × 3 = 6

22. भासः

23. डा० के०एस० नागराजन् ।

VI. यथानिर्देशम् उत्तरं लिखत – 3 × 3 = 9

24. सः महर्षिः धर्मात्मा उदारश्च ।

कः पाठः ? कः अवदत् ? धर्मात्मा कः ?

25. भवतु अस्माकं महाराज्ञी अभयदायिनी ।

कः पाठः ? के अवदन् ? महाराज्ञी का ?

26. अहमस्य प्रदास्यामि परमं वरमद्भुतम् ।

कः पाठः ? कः वरं ददाति ? कस्मै वरं ददाति ?

**अथवा**

जग्राह सहसा रविम् ।

कः पाठः ? कः अवदत् ? कम् अवदत् ?

VII. दशवाक्यैः उत्तरं कर्णाटकभाषया, आङ्ग्लभाषया, संस्कृतभाषया वा लिखत – 3 × 4 = 12

27. किमर्थं मुञ्जः भोजं मारयितुं प्रयतते ?

28. भीष्मयुधिष्ठिरयोः संवादं पद्यानुगुणं संगृह्य लिखत ।

29. 'भारतं संरक्षितुं सन्नद्धः योद्धा हिमवान्' कथम् ? इति विवृणुत ।

**अथवा**

भगवतः नारायणस्य अनुग्रहेण ध्रुवः 'ध्रुवपदं' कथं प्राप्तवान् ? कथाधारेण लिखत ।

VIII. श्लोकं पूरयत – 1 × 4 = 4

30. दूरीकरोति ..........................................................................................

..........................................................................................।

..........................................................................................

.................................................................. मङ्गलमातनोति ।।

IX. अधोलिखितम् अनुच्छेदं पठित्वा अनुच्छेदाधारितान् प्रश्नान् उत्तरत – 4 × 1 = 4

31. अम्बेडकरमहोदयः महाराष्ट्रस्य अम्बावाड इति ग्रामे अजायत । तस्य पिता रामजी सक्पालः माता च भीमाबायी । अम्बेडकरमहोदयस्य पूर्णं नाम भीमरावरामजी अम्बेडकर इति । एषः आदर्शविद्यार्थी आसीत् । महाराजः सय्याजिरावगायकवाडः भीमाय विद्यार्थिवेतनं दत्त्वा विदेशं प्रेषितवान् । भीमरावः अमेरिकादेशे विशेषाध्ययनं कृत्वा पि०एच०डि० पदवीं प्राप्तवान् । अध्ययनानन्तरं भारतं प्रत्यागत्य जनसेवां कृतवान् । तस्य सेवां परिगणय्य भारतसर्वकारः 'भारतरत्नम्' इति उपाधिना सममानयत् ।

i) अम्बेडकरमहोदयः कुत्र अजायत ?

ii) अम्बेडकरमहोदयाय विद्यार्थिवेतनं कः दत्तवान् ?

iii) भारतसर्वकारः अम्बेडकरमहोदयं केन उपाधिना सममानयत् ?

iv) अम्बेडकर महोदयस्य मातापितरौ कौ ?

## भागः - B

### (व्याकरणविभागः)

### (22 अङ्काः)

X. निम्नलिखितेषु प्रश्नेषु अपूर्णविवरणेषु वा प्रत्येकं चत्वारः विकल्पाः प्रदत्ताः । तेषु एकः एव शुद्धः उपयुक्तः वा वर्तते । सम्यक् उत्तरस्य चयनं कृत्वा लिखत — $10 \times 1 = 10$

32. 'भार्या' अस्य समानार्थकपदम् इदं भवति –

(A) पत्नी (B) पतिः

(C) जनकः (D) माता ।

33. 'कृष्णः' अस्य विरुद्धार्थकपदम् इदं भवति –

(A) हरितः (B) श्वेतः

(C) रक्तः (D) पीतः ।

34. 'कुबुद्धिरेषा' अस्य सन्धिविभजनम् एवं भवति –

(A) कुबुद्धि + रेषा (B) कुबुद्धि + एषा

(C) कु + बुद्धिरेषा (D) कुबुद्धिः + एषा ।

35. 'राजकुमारः' अस्य स्त्रीलिङ्गरूपम् इदं भवति –

(A) राजकुमारि (B) राजकुमारा

(C) राजकुमारिणी (D) राजकुमारी ।

36. 'उपनिषदा' अत्र एषा विभक्तिः भवति –

(A) प्रथमा विभक्तिः (B) द्वितीया विभक्तिः

(C) तृतीया विभक्तिः (D) चतुर्थी विभक्तिः ।

37. अत्र 'यण्' सन्धेः उदाहरणम् इदं भवति –

(A) चराचरम् (B) आत्मन्येव

(C) रामेति (D) दिव्यौषधम् ।

38. 'अपठत्' अत्र एषः लकारः भवति –

(A) लट् लकारः (B) लिट् लकारः

(C) लङ् लकारः (D) लिङ् लकारः ।

39. भाग्यानि <u>काले</u> फलन्ति – अत्र रेखाङ्कितपदस्य समुचितं प्रश्नवाचकपदं इदं भवति –

(A) कति (B) कदा

(C) कथम् (D) कुत्र ।

40. 'उदेति' अत्र एषः पुरुषः भवति –

(A) प्रथमपुरुषः (B) मध्यमपुरुषः

(C) उत्तमपुरुषः (D) अन्यपुरुषः ।

41. एषु व्याकरणशुद्धं वाक्यम् इदं भवति –

(A) बालेन सह पिता गच्छति (B) बालं सह पिता गच्छति

(C) बालाय सह पिता गच्छति (D) बालस्य सह पिता गच्छति ।

42. विग्रहवाक्यं विलिख्य समासनाम लिखत – $2 \times 1 = 2$

a) उपनगरम्

b) जनसेवा ।

**अथवा**

समासं कृत्वा समासनाम लिखत –

a) नीलः कण्ठः यस्य सः =

b) वर्षं वर्षं प्रति =

43. वाक्ये विद्यमानं कृदन्तपदं चित्वा प्रत्ययस्य नाम लिखत – $2 \times 1 = 2$

a) रामः श्लोकार्थं ज्ञातवान् ।

b) नगरे शोभमानम् उपवनम् अस्ति ।

44. प्रयोगपरिवर्तनं कुरुत – $2 \times 1 = 2$

a) युवकः चित्रं दृष्टवान् ।

b) बालेन कथा पठ्यते ।

XI. वाक्ये विद्यमानं अलङ्कारं सलक्षणं विवृणुत – $1 \times 3 = 3$

45. सौजन्यमेव सुवर्णम् ।

XII. प्रस्तारं विलिख्य गणविभागं कृत्वा छन्दोनाम लिखत – $1 \times 3 = 3$

46. मयिपततिगरीयानम्ब ते पक्षपातः ।

# भागः - C

## (रचनाविभागः)

## (16 अङ्काः)

XIII. संस्कृतभाषया अनुवादं कुरुत — 1 × 3 = 3

47. ದೆಹಲಿನಗರವು ಪ್ರಪಂಚದ ವಿಶಾಲನಗರಗಳಲ್ಲಿ ಒಂದಾಗಿದೆ. ಅದಕ್ಕೆ ಪ್ರಾಚೀನಕಾಲದಲ್ಲಿ ಹಸ್ತಿನಾಪುರವೆಂಬ ಹೆಸರಿತ್ತು. ಅದು ಯಮುನಾ ನದಿಯ ತೀರದಲ್ಲಿದೆ.

Delhi is one of the largest cities of the world. It was known as 'Hastinapura' during the ancient times. It is situated on the banks of river Yamuna.

XIV. कर्णाटकभाषया, आङ्ग्लभाषया वा अनुवादं कुरुत – 1 × 3 = 3

48. सुदृढशरीरं सुखसाधनं भवति । देहस्य आरोग्यस्य रक्षणं मानवस्य अधीनम् । अतः नित्यव्यायामः शरीरस्य आरोग्यं रक्षति ।

XV. पत्रं लिखत – 1 × 5 = 5

49. बेङ्गलूरुनगरस्य सर्वकारीयप्रौढशालायाः विघ्नेशः/विनुता इति मत्वा कारणं संसूच्य वर्गोपाध्यायं प्रति विरामपत्रं लिखत ।

**अथवा**

प्रवासार्थं धनं प्रेषयितुं पितरं प्रति पत्र लिखत ।

XVI. 50. एकं विषयम् अधिकृत्य प्रबन्धं लिखत – 1 × 5 = 5

i) सङ्गणकयन्त्रस्य हानिलाभौ

ii) गणराज्योत्सवः

iii) परिसरः ।